# Shri Ganesha Mantra Prabhava Stutih

# શ્રીગણેશમન્ત્રપ્રભાવસ્તુતિઃ

## Document Information

Text title : Ganesha Mantra Prabhava Stutih

File name : gaNeshamantraprabhAvastutiH.itx

Category : ganesha, mantra

Location : doc_ganesha

Author : subrahmaNyayogi

Latest update : November 22, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2023

*sanskritdocuments.org*

# શ્રીગણેશમન્ત્રપ્રભાવસ્તુતિઃ

ઓમિત્યાદૌ વેદવિદો યં પ્રવદન્તિ
બ્રહ્માદ્યા યં લોકવિધાને પ્રણમન્તિ ।
યોઽન્તર્યામી પ્રાણિગણાનાં હૃદયસ્થઃ
તં વિઘ્નેશં દુઃખવિનાશં કલયામિ ॥ ૧॥

ગઙ્ગાગૌરીશઙ્કરસન્તોષકવૃત્તં
ગન્ધર્વાલીગીતચરિત્રં સુપવિત્રમ્ ।
યો દેવાનામાદિરનાદિર્જગદીશઃ
તં વિઘ્નેશં દુઃખવિનાશં કલયામિ ॥ ૨॥

ગચ્છેત્સિદ્ધિં યન્મનુજાપી કાર્યાણાં
ગન્તા પારં સંસૃતિસિન્ધોર્યદ્વેત્તા ।
ગર્વગ્રન્થેર્યઃ કિલ ભેત્તા ગણરાજઃ
તં વિઘ્નેશં દુઃખવિનાશં કલયામિ ॥ ૩॥

તણ્યેત્યુચ્ચૈર્વર્ણજમાદૌ પૂજાર્થં
યદ્યન્ત્રાન્તઃ પશ્ચિમકોણે નિર્દિષ્ટમ્ ।
બીજં ધ્યાતુઃ પુષ્ટિદમાથ્વરણવાક્યૈઃ
તં વિઘ્નેશં દુઃખવિનાશં કલયામિ ॥ ૪॥

પદ્ભ્યાં પદ્મશ્રીમદહૃદ્ભ્યાં પ્રત્યૂષે
મૂલાધારામ્ભોરુહ ભાસ્વદ્ભાનુભ્યામ્ ।
યોગી યસ્ય પ્રત્યહમજપાર્પણદક્ષઃ
તં વિઘ્નેશં દુઃખવિનાશં કલયામિ ॥ ૫॥

તત્ત્વં યસ્ય શ્રુતિગુરુવાક્યૈરધિગત્ય
જ્ઞાની પ્રારબ્ધાનુભવાન્તે નિજધામ ।
શાન્તાવિદ્યસ્તત્કૃતબોધઃ સ્વયમીયાત્
તં વિઘ્નેશં દુઃખવિનાશં કલયામિ ॥ ૬॥

યે યે ભોગા લોકહિતાર્થાઃ સપુમાર્થાઃ
યે યે યોગાઃ સાધ્યસુલોકાઃ સુકૃતાર્થાઃ ।
તે સર્વે સ્યુર્યન્મનુજપતઃ પુરુષાણાં
તં વિઘ્નેશં દુઃખવિનાશં કલયામિ ॥ ૭॥

નત્વા નિત્યં યસ્ય પદાબ્જં મુહુરર્થી
નિર્દ્વૈતાત્માખણ્ડસુખઃ સ્યાદ્ધતમોહઃ ।
કામાન્પ્રાપ્નોતીતિ કિમાશ્ચર્યમિદાનીં
તં વિઘ્નેશં દુઃખવિનાશં કલયામિ ॥ ૮॥

મસ્તપ્રોદ્યચ્ચન્દ્રકિશોરં કરિવક્ત્રં
પુસ્તાક્ષસ્રક્પાશ સૃણીસ્ફીતકરાબ્જમ્ ।
શૂર્પશ્રોત્રં સુન્દરગાત્રં શિવપુત્રં
તં વિઘ્નેશં દુઃખવિનાશં કલયામિ ॥ ૯॥

સિદ્ધાન્તાર્થાં સિદ્ધિગણેશસ્તુતિમેનાં
સુબ્રહ્મણ્યાહ્વયસૂર્યુક્તામનુયુક્તામ્ ।
ઉક્ત્વા શ્રુત્વાપેક્ષિતકાર્યં નિર્વિઘ્નં
મુક્ત્વા મોહં બોધમુપેયાત્તદ્ભક્તઃ ॥ ૧૦॥

ઇતિ શ્રીસુબ્રહ્મણ્યયોગિકૃતા શ્રીગણેશમન્ત્રપ્રભાવસ્તુતિઃ સમાપ્તા ।

*Shri Ganesha Mantra Prabhava Stutih*

pdf was typeset on November 22, 2023

Please send corrections to *sanskrit@cheerful.com*